**DIET MALAPPURAM & VIJAYABHERI MALAPPURAM**

**SSLC PRE- MODEL EXAMINATION , MARCH 2022**

SANSKRIT ( SET 3)

TIME 1:30 hrs SCORE :40

**निर्देशाः** -

1. 20 निमेषाः समाश्वाससमयः। प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः।

2. प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।

3. प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः।

4. 1 - 24 प्रश्नेभ्यः परमतः 40 अङ्काः कल्पिताः।

**I . प्रश्नानां प्रत्येकम् एकैकः अङ्कः।**

**भागः 1.**

**( 1 - 6 ) चतुर्णां समुचितम् उत्तरं कोष्ठकात् चित्वा लिखत ।** **( 4X1=4)**

1. लुब्धेन सेव्यमानम् -- - - न परिपाकम् एति।

( अन्नम्, धनम्, वस्त्रम् )

2. निधिचालसुखमा . . . . . इति कृतिः कस्मिन् रागे रचितं भवति ?

( कल्याणिरागे , भूपालरागे , श्रीरागरागे )

3. अयि शुभे ! किमेवं रोदिषि ? कस्य वचनमिदम्?

( सुराधिपस्य, नराधिपस्य, देशाधिपस्य)

4. शङ्करः कैः सह भिक्षाटनम् अकरोत् ?

( तापसैः सह, सवयोभिः सह, मात्रा सह )

5. सस्यानि प्रमुखतया कति विधानि भवन्ति ?

( द्विधा, त्रिधा, चतुर्धा, )

6. " संस्कृतपठनात् ऋते कश्चन यथार्थभारतीयः न भवेत् ।" कस्य वचनमिदम् ?

( महात्मागान्धिनः, डा. एस् राधाकृष्णस्य, बालगङ्गाधरतिलकस्य)

**भागः 2.**

( 7- 9 ) **प्रश्नानां प्रत्येकं एकैकः अङ्कः ।** ( 3X1=3)

7. पार्वती किं गणयामास ?

( कुमुदपत्राणि, कदम्बपत्राणि, लीलाकमलपत्राणि)

8. शकुन्तलादुष्यन्तौ केन विधिना परिणीतौ ?

( गान्धर्वविधिना, ब्रह्मविधिना, आसुरविधिना )

9. ' नाकम्' इत्यस्य समानार्थकं पदं लिखत ।

( स्वर्गः, भूमिः, सर्पः)

**II . प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।** ( 1X2=2)

**भागः 1.**

**10. अपरेषां कृते प्रयोजनरहितं जन्म निन्दनीयम् इति आशयप्रतिपादकं श्लोकं चित्वा लिखत ।**

क) तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी ।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते ।।

ख) विधिना खलु वञ्चिता वयं
वितरीतुं वटवे न शक्नुमः ।
अपि भैक्ष्यमकिञ्चनत्वतो
धिगिदं जन्म निरर्थकं गतम् ।।

**भागः 2.**

( 11- 12) **प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।एकस्य उत्तरं लिखत ।** ( 1X2=2)

**11. सूचनानुसारं गद्यक्रमं लिखतु ।**

यदा पुनस्त्वं भजनं करोषि
तदा समो मा भव दाम्भिकैस्त्वम् ।
परावलोकाय हि ये भजन्ति

समाजगेहे च चतुष्पथे च ।।

पुन: यदा त्वं- - - - - करोषि, तदा त्वम् ये - - - - - समाजगेहे चतुष्पथे च भजन्ति हि- - - - - सम मा भव ।

**12. श्लोकं पठित्वा अधोदत्तेभ्यः उचितं आशयं चित्वा लिखत ।**

मयापि देयं प्रतिवाचिकं न ते
स्वनाम मत्कर्णसुधामकुर्वते ।

परेण पुंसा हि ममापि सङ्कथा

कुलाबलाचारसहासनासहा ।।

१. राष्ट्रसेवायै भर्तारं प्रेषयति ।

२. अपरिचितेन भाषितुं नोत्सहे ।

३. सप्तर्षीणां वचनं श्रद्धया श्रुणोति ।

**III. ( 13- 16) प्रश्नानां प्रत्येकं त्रयः अङ्काः । त्रयाणाम् उत्तरं लिखत । ( 3X3=9)**

**भागः 1.**

**13. i. उदाहरणानुसारं पदच्छेदं लिखत ।**

कुर्वन्नासीत् - कुर्वन् + आसीत् ।

गच्छन्नासीत् - - - - - - +- - - - - - ।

**ii. उदाहरणानुसारं विग्रहं लिखत ।**

उदा- मितश्च असौ आहारश्च- मिताहारः ।

हितश्च असौ आहारश्च - - - - - - - - ।

**iii. अधोदत्तवाक्यात् सम्बोधनापदं चित्वा लिखत ।**

" भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि ।"

**14. अधोदत्तवाक्यात् क्त्वान्त- तुमुन्नन्त- ल्यबन्तरूपाणि विविच्य लिखत ।**

महाराजस्य आदेशं श्रुत्वा अपि त्यागराजः राजप्रशस्तिपरां कृतिं विरच्य प्रदातुं सन्नद्धो नाभवत् ।

**15. अधोदत्तानां औषधसस्यानां औषधगुणान् लिखत ।**

१ . आमलकी -

२ . हरिद्रा -

३ . निम्बः -

**16. समुचितम् उत्तरं चित्वा लिखत ।**

" स्वराज्यम् अस्माकं जन्माधिकारः एव ।" -

" जय् जवान् जय् किसान् ।" -

" एका जाति: , एको धर्म: , एको देव: मनुष्याणाम् ।" -

| |
|---|
| लाल् बहदूर् शास्त्रि: |
| श्री नारायणगुरुः |
| बालगङ्गाधरतिलक: |

**भागः 2.**

**प्रश्नानां प्रत्येकं त्रयः अङ्काः ।** ( 1X3=3)

**17. यथोचितं योजयत ।**

| | | |
|---|---|---|
| गुप्तदर्शी | - | पि सी देवस्या |
| क्रिस्तुभागवतम् | - | रहस्यदर्शी |
| गिरिप्रभाषणम् | - | येशुदेवः |

**IV . ( 18- 20) प्रश्नानां प्रत्येकं चत्वारः अङ्काः । प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।**

**भागः 1.** ( 2X4=8)

**18. श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।**

शनैरर्थ: शनै:पन्था:
शनै: पर्वतमारुहेत् |
शनैर्विद्या च धर्मश्च
व्यायामश्च शनै: शनै: |

क) श्लोके मार्ग: इत्यर्थं पदं चित्वा लिखत |

ख) " व्यायामश्च" इत्यस्य पदच्छेदं लिखत |

ग) मन्दं इत्यर्थकं पदं किम् ?

घ) व्यायाम: कथं करणीय: ?

**19. जीवनचरितं लिखत**

| | | |
|---|---|---|
| नाम | - | स्वातितिरुनाल् रामवर्मा । |
| जन्म | - | 1813 एप्रिल् 13 । |
| पितरौ | - | राजराजवर्मा वलियकोयितम्पुरान् , राणी लक्ष्मीभाई च । |
| कर्ममण्डलम् | - | प्रजापालनम् , संगीतम् च । |
| प्रशस्तिः | - | गर्भश्रीमान् । |
| कृतयः | - | रागमालिकास्वरजतिः , नवरात्रिकीर्त्तनानि च । |
| देहवियोगः | - | 1846 डिसम्बर् 27. |

**20.** पट्टिकां पूरयत ।

| **विभागः** | **लक्षणम्** | **उदाहरणम्** |
|---|---|---|
| वनस्पतिः | . . . . . . . . . | पनसः |
| . . . . . . . . . . . . | सुव्यक्तपुष्पः | आम्रः |
| वीरुत् | प्रतानैः प्रसारिता | . . . . . . . . . . . . |
| . . . . . . . . . . . . . . | फलपाकान्ता | गोधूमः |

भागः 2.

( 21- 22) **प्रश्नानां प्रत्येकं चत्वारः अङ्काः। प्रश्नेभ्यः एकस्य उत्तरं लिखत ।**

( 1X4=4)

**21. प्रदत्तान् प्रयोगान् कर्तरि कर्मणि इति क्रमेण पट्टिकायां योजयतु ।**

| **कर्तरि** | **कर्मणि** |
|---|---|
| पार्वती लीलाकमलपत्राणि गणयति । | राधिकया नृत्तम् आचरितम् । |
| | |
| | |

क) बालैः क्रीडाङ्कणं गम्यते ।

ख) माता पुत्रं वदति।

ग) जनाः प्रतिदिनं वार्त्तापत्रं पठन्ति।

घ) नलेन हंसः दमयन्तीसन्निधिं प्रेष्यते ।

**22. सूचनाः उपयुज्य कण्वस्य स्वभावं निरूपयत ।**

**सूचनाः -** कालिदासः - अभिज्ञानशाकुन्तलम् - चतुर्थोऽङ्कः - शकुन्तलां पालयति - पुत्रीवात्सल्यम् - पुत्रीं प्रति उपदेशः ।

**V. प्रश्नानां प्रत्येकं पञ्च अङ्काः। प्रश्नेभ्यः एकस्य उत्तरं लिखत ।( 1X5=5)**

**23. प्रादेशिकभाषायां विवर्तयत ।**

डा. के जे येशुदासः भारतीयसङ्गीतविद्वत्सु अन्यतमः भवति। सः अनेकासु भारतीयभाषासु चलच्चित्रगीतानि अगायत्। अयं कर्णाटकसङ्गीतस्य मधुरकण्ठः गायकः । केरलराज्यस्य कोच्चिमण्डले अस्य जननम् अभवत् ।प्रसिद्धगायकस्य चेम्बै वैद्यनाथ- भागवतस्य शिष्योत्तमः भवत्ययम् ।

24. विश्वप्रसिद्धः महाकविः भवति कालिदासः ।तेन त्रीणि नाटकानि , द्वे महाकाव्ये च विरचितानि । मेघदूतं नाम सन्देशकाव्यं च तेन विरचितं भवति ।" उपमा कालिदासस्य" इति उक्तिः सुप्रसिद्धा एव ।तस्य अभिज्ञानशाकुन्तलनाटके पुरुवंशराजस्य दुष्यन्तस्य शकुन्तलायाः च कथा वर्ण्यते । नाटकस्य इतिवृत्तं महाभारतात् स्वीकृतं भवति ।